# ॥ वाल्मीकि रामायण॥

## २ अयोध्याकाण्ड

### अध्याय १५

स रामो रथमास्थाय सम्प्रहृष्टसुहृज्जनः ।
अपश्यन्नगरं श्रीमान्नानाजनसमाकुलम् ॥ १॥

स गृहैरभ्रसङ्काशैः पाण्डुरैरुपशोभितम् ।
राजमार्गं ययौ रामो मध्येनागरुधूपितम् ॥ २॥

शोभमानमसम्बाधं तं राजपथमुत्तमम् ।
संवृतं विविधैः पण्यैर्भक्ष्यैरुच्चावचैरपि ॥ ३॥

आशीर्वादान्बहूञ्शृण्वन्सुहृद्भिः समुदीरितान् ।
यथार्हं चापि सम्पूज्य सर्वानेव नरान्ययौ ॥ ४॥

पितामहैराचरितं तथैव प्रपितामहैः ।
अद्योपादाय तं मार्गमभिषिक्तोऽनुपालय ॥ ५॥

यथा स्म लालिताः पित्रा यथा पूर्वैः पितामहैः ।
ततः सुखतरं सर्वे रामे वत्स्याम राजनि ॥ ६॥

अलमद्य हि भुक्तेन परमार्थैरलं च नः ।
यथा पश्याम निर्यान्तं रामं राज्ये प्रतिष्ठितम् ॥ ७॥

अतो हि न प्रियतरं नान्यत्किं चिद्भविष्यति ।
यथाभिषेको रामस्य राज्येनामिततेजसः ॥ ८॥

एताश्चान्याश्च सुहृदामुदासीनः कथाः शुभाः ।
आत्मसम्पूजनीः शृण्वन्ययौ रामो महापथम् ॥ ९॥

न हि तस्मान्मनः कश्चिच्चक्षुषी वा नरोत्तमात् ।
नरः शक्नोत्यपाक्रष्टुमतिक्रान्तेऽपि राघवे ॥ १०॥

सर्वेषां स हि धर्मात्मा वर्णानां कुरुते दयाम् ।
चतुर्णां हि वयःस्थानां तेन ते तमनुव्रताः ॥ ११॥

स राजकुलमासाद्य महेन्द्रभवनोपमम् ।
राजपुत्रः पितुर्वेश्म प्रविवेश श्रिया ज्वलन् ॥ १२॥

स सर्वाः समतिक्रम्य कक्ष्या दशरथात्मजः ।
संनिवर्त्य जनं सर्वं शुद्धान्तःपुरमभ्यगात् ॥ १३॥

ततः प्रविष्टे पितुरन्तिकं तदा
जनः स सर्वो मुदितो नृपात्मजे ।
प्रतीक्षते तस्य पुनः स्म निर्गमं
यथोदयं चन्द्रमसः सरित्पतिः ॥ १४॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com